सर्वत्रिखण्डिनि प्रकट योगिनि त्रैलोक्यमोहनचक्र स्वामिनि कामाकर्षिणि बुद्ध्याकर्षिण्यहङ्काराकर्षिणि शब्दाकर्षिणि

स्पर्शाकर्षिणि रूपाकर्षिणि रसाकर्षिणि गन्धाकर्षिणि चित्ताकर्षिणि धैर्या कर्षिणि स्मृत्याकर्षिणि नामाकर्षिणि बीजाकर्षिण्यात्मा कर्षिण्यमृताकर्षिणि शरीराकर्षिणि गुप्तयोगिनि सर्वाशा परिपूरक-चक्रस्वामिन्यनङ्गकुसुमे ऽनङ्गमेखले ऽनङ्ग मदनेऽनङ्ग मदनातुरे ऽनङ्गरेखेऽनङ्ग वेगिन्यङ्गाङ्कुशेऽनङ्ग मालिनि गुप्ततर योगिनि सर्वसङ्क्षोभणचक्र-स्वामिनि सर्वसङ्क्षोभिणि सर्वविद्राविणि सर्वाकर्षिणि सर्वाह्लादिनि सर्वसम्मोहिनि सर्वस्तम्भिनि सर्वजृम्भिणि सर्ववशङ्करि सर्वरञ्जिनि सर्वोन्मादिनि सर्वार्थसाधिके सर्वसम्पत्तिपूरिणि सर्वमन्त्रमयि सर्वद्वन्द्वक्षयङ्करि सम्प्रदाय-योगिनि सर्वसौभाग्य-दायक-चक्र स्वामिनि सर्वसिद्धिप्रदे सर्वसम्पत्प्रदे सर्वप्रियङ्करि सर्वमङ्गलकारिणि सर्वकामप्रदे सर्वदुःखविमोचनि सर्वमृत्युप्रशमनि सर्वविघ्ननिवारिणि सर्वाङ्ग सुन्दरि सर्वसौभाग्यदायिनि कुलोत्तीर्णयोगिनि सर्वार्थसाधक-चक्र स्वामिनि सर्वज्ञे सर्वशक्ते सर्वैश्वर्यफलप्रदे सर्वज्ञानमयि सर्वव्याधिविनाशिनि सर्वाधार स्वरूपे सर्वपापहरे सर्वानन्दमयि सर्वरक्षास्वरूपिणि सर्वेप्सितफलप्रदे निगर्भयोगिनि सर्वरक्षा करचक्र स्वामिनि वशिनि कामेश्वरि मोदिनि विमलेऽरुणे जयिनि सर्वेश्वरि कौलिनि रहस्ययोगिनि सर्वरोगहर चक्रस्वामिनि बाणिनि चापिनि पाशिन्य ङ्कुशिनि महाकामेश्वरि महावज्रेश्वरि महाभगमालिनि महाश्रीसुन्दर्यति-रहस्ययोगिनि सर्वसिद्धि प्रदचक्र स्वामिनि श्रीश्रीमहाभट्टारिके परापरातिरहस्ययोगिनि सर्वानन्दमयचक्र स्वामिनि त्रिपुरे त्रिपुरेशि त्रिपुरसुन्दरि त्रिपुर वासिनि त्रिपुराश्री त्रिपुर मालिनि त्रिपुरसिद्धे त्रिपुराम्बे महात्रिपुरसुन्दरि महा महेश्वरि महामहाराज्ञि महामहाशक्ते महामहा गुप्ते महामहाज्ञप्ते महामहानन्दे महामहास्पन्दे महामहाशये महामहा श्रीचक्रनगर सम्राज्ञि नमस्ते त्रिः स्वाहा श्रीं ह्रीं ऐं

३- (मूलं) ३-ह्रीं सर्ववशीकरण-कर विद्रुमाकार-रागस्वरूप-पाशाविर्भूता ३-ॐ आं ह्रीं क्रों एहि परमेश्वरि स्वाहा अपराजिताख्य हयारूढ–अश्वारूढा-अधिष्ठित

अनेक-कोटि-अश्वैरावृतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं)३ -क्रों सर्वस्तम्भन-कर रौप्यमय क्रोधाकाराङ्कुशाविर्भूता ३-क्लीं हैं ह्सौः ह्सौः हैं क्लीं रणकोलाहलाख्य गज समारूढ सिन्धुर-व्रज-अधिष्ठित संपत्करी-सेवितां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) ३-धं सर्वसम्मोहन-कर-मनोरूप-पुण्ड्रेक्षु-कोदण्डाविर्भूता-ऐं ह्रीं श्रीं ऐं क्लीं सौः ॐ नमो भगवति श्रीमातङ्गीश्वरि

सर्वजन-मनोहारि सर्वमुखरञ्जिनि क्लीं ह्रीं श्रीं सर्वराजवशङ्करि सर्वस्त्रीपुरुषवशङ्करि सर्वदुष्टमृगवशङ्करि सर्वसत्ववशङ्करि

सर्वलोकवशङ्करि अमुकं मे वशमानय स्वाहा सौः क्लीं ऐं श्रीं ह्रीं ऐं-श्रीराजश्यामला सेवितां श्रीललिता-महात्रिपुरसुन्दरी

श्रीपादुकां पूजयामि तर्पयामि नमः

ॐ ऐं क्लीं सौः नमः मातङ्गि श्यामले सर्वजनमनोहरि-हृदयदेवि सर्वमुखरञ्जिनि-शिरोदेवि सर्वराजवशङ्करि-शिखादेवि

सर्वस्त्रीपुरुषवशङ्करि-कवचदेवि सर्वदुष्टमृगवशङ्करि-नेत्र देवि सर्वसत्व-लोक-वशङ्करि-अस्त्रदेवि परप्रकाशानन्दनाथमयि

परमेशानन्द नाथमयि परशिवानन्दनाथमयि कामेश्वर्यम्बामयि मोक्षानन्दनाथमयि कामानन्दनाथ मयि अमृतानन्दनाथमयि

ईशानानन्दनाथमयि तत्पुरुषानन्दनाथमयि अघोरानन्दनाथमयि वामदेवानन्दनाथमयि सद्योजातानन्दनाथमयि पञ्चोत्तरानन्द

नाथमयि परमानन्द-नाथमयि सर्वज्ञानन्दनाथमयि सर्वानन्दनाथमयि सिद्धानन्दनाथमयि गोविन्दानन्दनाथमयि शङ्करा

नन्दनाथमयि गुरुपङ्क्तिरूपे रति प्रीति मनोभव त्रिकोण-प्रथम-चक्रस्वामिनि द्रावणबाण शोषणबाण बन्धनबाण मोहनबाण

उन्मादनबाण पञ्चकोण-मूलस्थाः कामराज मन्मथ कन्दर्प मकरकेतन मनोभव पञ्चकोण-अग्रस्थाः द्वितीय-चक्र-स्वामिनि

ब्राह्मि माहेश्वरि कौमारि वैष्णवि वाराहि माहेन्दि चामुंडा चंडिका अष्टदल-मूलस्थाः लक्ष्मि सरस्वति रति प्रीति कीर्ति शान्ति

पुष्टि तुष्टि अष्टदल-अग्रस्थाः तृतीय-चक्र-स्वामिनि वामे ज्योष्ठे रौद्रि शान्ति श्रद्धे सरस्वति क्रियाशक्ते लक्ष्मि सृष्टि मोहिनि

प्रमथिनि आश्वासिनि वीचि विद्युन्मालिनि सुरानन्दे नाग बुद्धिके षोडशदल-चतुर्थ-चक्र-स्वामिनि असिताङ्गभैरव रुरु भैरव

चण्डभैरव क्रोधनभैरव उन्मत्तभैरव कपालिभैरव भीषणभैरव संहारभैरव द्वितीयाष्ट दल-पञ्चम-चक्रस्वामिनि मातङ्गीश्वरि

सिद्धलक्ष्मि महामातङ्गीश्वरि महासिद्धलक्ष्मि चतुर्दल-षष्ठ-चक्रस्वामिनि गणपति दुर्गे वटुक क्षेत्रपाल भूपुरान्त-सप्तम- चक्र-

स्वामिनि सरस्वति लक्ष्मि शङ्खनिधे पद्मनिधे भूपुरद्वारस्थाः इन्द्र अग्नि यम निऋते वरुण वायु सोम ईशान ब्रह्म विष्णु भूपुरस्थाः वास्तुपति ब्रह्मपरिवृते हंसमूर्ति-परप्रकाश-पूर्ण-नित्य-करुणान्दनाथ संप्रदाय-गुरु-पङ्क्तिरूपे शुक-शारिका-वीणा-

वेणुश्यामला-परिवृते लघुश्यामला-वाग्वादिनि-नकुली-परिपूजिते हसन्ति-सारथ्य-गेयचक्र-रथारूढे नमस्ते त्रिः स्वाहा सौः

क्लीं ऐं

३- (मूलं) ३-द्रां द्रीं क्लीं ब्लूं सः पद्म कैरव कल्हार अशोक चूतात्मक सर्वजृम्भनकर पञ्चतन्मात्रात्मक सायकाविर्भूता-ऐं

ग्लौं ऐं नमो भगवति वार्तालि वार्तालि वाराहि वाराहि वराहमुखि वराहमुखि अन्धे अन्धिनि नमः रुन्धे रुन्धिनि नमः जम्भे

जम्भिनि नमः मोहे मोहिनि नमः स्तम्भे स्तम्भिनि नमः सर्व दुष्टप्रदुष्टानां सर्वेषां सर्ववाक् चित्त-चक्षुर्मुख-गति-जिह्वा-स्तम्भनं कुरु कुरु शीघ्रं वश्यं ऐं ग्लौं ठःठःठःठः हुं अस्त्राय फट् श्रीकोलमुखी सेवितां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां

पूजयामि तर्पयामि नमः

ॐ ऐं ग्लौं नमः कोलमुखि दण्डनाथे वार्ताळि-हृदयदेवि वाराहि-शिरोदेवि वराहमुखि-शिखादेवि अन्धिनि-कवचदेवि

रुन्धिनि-नेत्रदेवि जम्भिनि-अस्त्रदेवि प्रभावानन्दनाथमयि आदिनाथानन्दनाथमयि विमलानन्द-नाथ-मयि समया-नन्दनाथमयि

शिवानन्दनाथमयि निर्वाणानन्दनाथमयि गणपानन्दनाथमयि हरानन्दनाथमयि परशम्भ्वानन्दनाथमयि चिदम्शानन्दनाथमयि

कुरुनाथानन्दनाथमयि विशुद्धानन्दनाथमयि कुला-नन्दनाथमयि कुन्तशेखरानन्दनाथमयि सुडिम्बानन्दनाथमयि

सुन्दरानन्दनाथमयि केशानन्दनाथमयि गुरुपङ्क्तिरूपे जम्भिनि मोहिनि स्तम्भिनि त्रिकोण-प्रथम-चक्रस्वामिनि अन्धिनि

रुन्धिनि जम्भिनि मोहिनि स्तम्भिनि पञ्चकोण-द्वितीय-चक्रस्वामिनि ब्राह्मि माहेश्वरि कौमारि वैष्णवि इन्द्राणि चामुंडा

षट्कोणमूलस्थाः याकिनि राकिनि लाकिनि डाकिनि काकिनि साकिनि हाकिनि षट्कोणाग्र-मध्यस्थाः क्रोधिनि स्तम्भिनि

चामर-ग्राहिणि पार्श्वद्वयस्थाः स्तम्भन-मुसल आकर्षण-हलायुध पार्श्वद्वयस्थाः चण्डोच्चण्ड पुरतस्थ तृतीय चक्रस्वामिनि

वार्तालि वाराहि वराहमुखि अन्धिनि रुन्धिनि जम्भिनि मोहिनि स्तम्भिनि अष्टदलस्थाः महामहिष-देवीवाहन पुरतस्थ चतुर्थ

चक्रस्वामिनि जम्भिनि इन्द्र अप्सरसः सिद्ध द्वादशादित्य अग्ने साध्य विश्वेदेव विश्वकर्म यम मातरः रुद्रपरिचारक रुद्र मोहिनि

निरृते राक्षस मित्र गन्धर्व भूतगण वरुण वसु विद्याधर किन्नर वायु स्तम्भिनि चित्ररथ तुम्बुरु नारद यक्ष सोम कुबेर देव विष्णो

ईशान ब्रह्म अश्विनीदेव धन्वन्तरे विनायक शतपत्र-स्थाः क्षेत्रपाल सिंहवर-देवीवहन महाकृष्णमृग-राज-देवीवाहन पुरतस्थाः

पञ्चम-चक्रस्वामिनि ऐरवत पुण्डरीक वामन कुमुद अञ्जन पुष्पदन्त सार्वभौम सुप्रतीक सहस्रारस्थाः मदाशक्त्याश्लिष्ट

सुधाब्धि पुरतस्थ हेतुक त्रिपुरान्तक अग्नि-यम-जिह्व एकपाद काल कराल भीमरूप हाटकेश अचल-भैरव-क्षेत्रपाल

भूपुरस्थाः षष्ठ-चक्रस्वामिनि धूम्र-अस्त्र-मृत्युच्चाटन-वाराही-परिसेविते लघुवाराही-स्वप्नवाराही-तिरस्करिणी-परिपूजिते

स्तम्भिनि-सारथ्य-किरि-चक्र-रथारूढे नमस्ते त्रिः स्वाहा ग्लौं ऐं

३- (मूलं) पञ्चमी दण्डनाथा सङ्केता समयेश्वरीति देव-ऋषि-गण-सङ्घात द्वादश-नामेणस्तूमानात्म-वैभवा ३-ऐं ग्लौं ऐं नमो

भगवति वार्तालि वार्तालि वाराहि वाराहि वराहमुखि वराहमुखि अन्धे अन्धिनि नमः रुन्धे रुन्धिनि नमः जम्भे जम्भिनि नमः

मोहे मोहिनि नमः स्तम्भे स्तम्भिनि नमः सर्व दुष्टप्रदुष्टानां सर्वेषां सर्ववाक् चित्त-चक्षुर्मुख-गति-जिह्वा-स्तम्भनं कुरु कुरु शीघ्रं

वश्यं ऐं ग्लौं ठःठःठःठः हुं अस्त्राय फट् महामहिषवाहना वज्रघोषाख्य-सिंहवाहना महाकृष्ण -मृग-वाहना स्तम्भिनी- सारथ्य- किरिचक्र-रथारूढ-श्रीकोलमुखी दण्डनाथाया पुरस्कृतां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३-ऐं ग्लौं स्तं स्तम्भिन्यै नमः स्तम्भिनी श्रीपादुकां पूजयामि तर्पयामि नमः

ऐं ग्लौं- पञ्चमि जय जय ऐं ग्लौं- दण्डनाथे जय जय ऐं ग्लौं- सङ्केते जय जय ऐं ग्लौं- समयेश्वरि जय जय

ऐं ग्लौं- समय-सङ्केते जय जय ऐं ग्लौं- वाराहि जय जय ऐं ग्लौं- पोत्रिणि जय जय ऐं ग्लौं- शिवे जय जय

ऐं ग्लौं- वार्ताळि जय जय ऐं ग्लौं- महासेने जय जय ऐं ग्लौं- आज्ञा-चक्रेश्वरि जय जय ऐं ग्लौं- अरिघ्नि जय जय

३- (मूलं) सङ्गीतयोगिनी श्यामा श्यामला मन्त्र नायिकेति देव-ऋषि-गण-सङ्घात षोडश-नामेणस्तूमानात्म-वैभवा ऐं ह्रीं

श्रीं ऐं क्लीं सौः ॐ नमो भगवति श्रीमातङ्गीश्वरि सर्वजनमनोहारि सर्वमुखरञ्जिनि क्लीं ह्रीं श्रीं सर्वराज वशङ्करि सर्वस्त्री पुरुष वशङ्करि सर्वदुष्टमृगवशङ्करि सर्वसत्व-वशङ्करि सर्वलोकवशङ्करि अमुकं मे वशमानय स्वाहा सौः क्लीं ऐं श्रीं ह्रीं ऐं हसन्ति सारथ्य सप्तपर्वात्मक-गेयचक्र रथारूढ-श्रीराजश्यामला मन्त्रिण्या परिसेवितां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३-हसन्ति हसितालापे मातङ्गि परिचारिके मम भय विघ्न नाशं कुरु कुरु ठः ठः ठः हसन्ति श्रीपादुकां पूजयामि तर्पयामि नमः

ऐं क्लीं सौः संगीतयोगिनि जय जय ऐं क्लीं सौः श्यामे जय जय ऐं क्लीं सौः श्यामळे जय जय ऐं क्लीं सौः मन्त्र-नायिके जय जय ऐं क्लीं सौः मन्त्रिणि जय जय ऐं क्लीं सौः सचिवेशानि जय जय ऐं क्लीं सौः प्रधानेशि जय जय ऐं क्लीं सौः शुक-प्रिये जय जय ऐं क्लीं सौः वीणावति जय जय ऐं क्लीं सौः वैणिकि जय जय ऐं क्लीं सौः मुद्रिणि जय जय ऐं क्लीं सौः प्रियक-प्रिये जय जय ऐं क्लीं सौः नीप-प्रिये जय जय ऐं क्लीं सौः कदंबेशि जय जय ऐं क्लीं सौः कदंब-वन-वासिनि जय जय ऐं क्लीं सौः सदा-मदे जय जय

३- (मूलं) सिंहासनेश्वरी ललिता महाराज्ञी वरङ्कुशेति देव-ऋषि-गण-सङ्घात पञ्चविंशति-नामभिः स्तूमानात्म-वैभवां इरादेव्यदि षड्सारथ्य नवपर्वात्मक श्रीचक्ररथारूढां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३-इरि-मिलि-किरि-किलि-परिमिरों-श्रीचक्रराजस्य सारथी इरा देवी श्रीपादुकां पूजयामि तर्पयामि नमः

३-ॐ ह्रीं नमो भगवति महात्रिपुरभैरवि मम त्रैपुर रक्षां कुरु कुरु-श्रीचक्रराजस्य सारथी त्रिपुरभैरवी श्रीपादुकां पूजयामि तर्पयामि नमः

३-संहर संहर विघ्नरक्षो विभीषकान् कालय हुं फट् स्वाहा श्रीचक्रराजस्य सारथी संहारभैरव श्रीपादुकां पूजयामि तर्पयामि नमः

३-ब्लूं रक्ताभ्यो योगिनीभ्यो नमः श्रीचक्रराजस्य सारथी रक्तयोगिनीवल्लभ पूजयामि तर्पयामि नमः

३-सां सारसाय-बह्वाशनाय नमः श्रीचक्रराजस्य सारथी सारस श्रीपादुकां पूजयामि तर्पयामि नमः

३-दु-मुलुषु-मुलुषु-ह्रीं चामुण्डायै नमः श्रीचक्रराजस्य सारथी चामुण्डा श्रीपादुकां पूजयामि तर्पयामि नमः

३-सिंहासनेश्वरि जय जय ३-ललिते जय जय ३-महाराज्ञि जय जय ३-वराङ्कुशे जय जय ३-चापिनि जय जय ३-त्रिपुरे जय जय ३- महात्रिपुरसुन्दरि जय जय ३-सुन्दरी-चक्रनाथे जय जय ३-सम्राज्ञि जय जय ३-चक्रिणि जय जय ३-चक्रेश्वरि जय जय ३-महादेवि जय जय ३-कामेशि जय जय ३- परमेश्वरि जय जय ३-कामराज-प्रिये जय जय ३-कामकोटिगे जय जय ३-चक्रवर्तिनि जय जय ३-महाविद्ये जय जय ३-शिवे जय जय ३-अनङ्गवल्लभे जय जय ३- सर्व-पाटले जय जय ३- कुल-नाथे जय जय ३- आम्नाय-नाथे जय जय ३- सर्वाम्नाय-निवासिनि जय जय ३- शृङ्गार-नायिके जय जय

३- (मूलं) चक्रराज रथारूढ सर्वायुधपरीवृतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) चक्रराज रथारूढ ३-ॐ श्लीं पशु हुं फट्-पाशुपातास्त्र परीवृतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) चक्रराज रथारूढ ३-सहस्रार हुं फट्-सुदर्शनास्त्र परीवृतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) चक्रराज रथारूढ ३-ह्रीं स्फुर स्फुर प्रस्फुर प्रस्फुर घोर घोरतर तनु रूप चट चट प्र चट प्रचट कह कह वम वम बन्ध बन्ध घातय घातय हुं फट्-अघोरास्त्र परीवृतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) चक्रराज रथारूढ ३-आवायव्यया वायव्या व्यायवाया व्ययवाआ और्वायिव्यया वायव्या व्याय वायाव्ययर्वाऔ ओं हन हन हुं फट् स्वाहा-वाय्वस्त्र परीवृतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) चक्रराज रथारूढ ३-ग्निःत्यारिदु न्धुंसि ववेना श्वाविणि र्गादु तिदर्षप नः स | दःवे तिहादनि तःयतीराममसो मवानसु सेदवेतजा-आग्नेयास्त्र परीवृतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) चक्रराज रथारूढ ३-तर्षप नः स दःवे तिहादनि तःयतीराममसो मवानसु सेदवेतजा ग्निःत्यारिदु न्धुंसि ववेना श्वाविणि र्गादु तिअ-कृत्यास्त्र परीवृतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) चक्रराज रथारूढ ३-अति दुर्गाणि विश्वा नावेव सिन्धुं दुरित्याग्निःजातवेदसे सुनवाम सोम मरातीयतः निदहादि वेदः सनः पर्षद-दिनास्त्र परीवृतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) चक्रराज रथारूढ ३-इमं मे वरुण श्रुधी हवमद्या च मृळय। त्वामवस्यु राचके |तत्त्वायामि ब्रह्मणा वन्दमान स्तदाशास्ते यजमानो हविर्भिः। अहेऽमानो वरुणेहवोध्युरूश समान आयुः प्रमोषीः वारुणास्त्र परीवृतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) चक्रराज रथारूढ ३-ॐ ह्लीं बगळामुखि सर्वदुष्टानां वाचं मुख पदं स्तम्भय जिह्वां कीलय बुद्धिं विनाशय ह्लीं ॐ स्वाहा- ब्रह्मास्त्र परीवृतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) चक्रराज रथारूढ ३-ॐ ह्लीं हुं ग्लौं बगलामुखि ह्लां ह्लीं ह्लूं सर्वदुष्टानां ह्लैं ह्लौं ह्लः वाचं मुखं पदं स्तम्भय स्तम्भय ह्लः ह्लौं ह्लैं जिह्वां कीलय ह्लूं ह्लीं ह्लां बुद्धिं विनाशय ग्लौं हुं ह्लीं ॐ हुं फट्-वडवामुख्यधिष्टितां रणस्तम्भनास्त्र परीवृतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) चक्रराज रथारूढ ३-ॐ ह्लीं ग्लौं बगलामुखि सर्वदुष्टानां ॐ ह्लीं ग्लौं वाचं मुखं पदं ॐ ह्लीं ग्लौं स्तम्भय स्तम्भय ॐ ह्लीं ग्लौं जिह्वां कीलय कीलय ॐ ह्लीं ग्लौं बुद्धिं नाशय नाशय ॐ ह्लीं ग्लौं स्वाहा - जगत्स्तम्भन उल्कामुख्यधिष्टितां परीवृतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) चक्रराज रथारूढ ३-ॐ ह्लीं हौं ह्लीं ॐ बगलामुखि सर्वदुष्टानां ॐ ह्लीं हौं ह्लीं ॐ वाचं मुखं पदं ॐ ह्लीं हौं ह्लीं ॐ स्तम्भय स्तम्भय ॐ ह्लीं हौं ह्लीं ॐ जिह्वां कीलय कीलय ॐ ह्लीं हौं ह्लीं ॐ बुद्धिं नाशय नाशय ॐ ह्लीं हौं ह्लीं ॐ स्वाहा - जातवेदोमुख्यधिष्टितां देवता स्तम्भनास्त्र परीवृतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) चक्रराज रथारूढ ३-ॐ ह्लीं रं रं रं रं रं प्रस्फुर प्रस्फुर बगलामुखि ॐ ह्लीं रं रं रं रं रं प्रस्फुर प्रस्फुर सर्वदुष्टानां ॐ ह्लीं रं रं रं रं रं प्रस्फुर प्रस्फुर वाचं मुखं पदं स्तम्भय स्तम्भय ॐ ह्लीं रं रं रं रं रं प्रस्फुर प्रस्फुर जिह्वां कीलय कीलय ॐ ह्लीं रं रं रं रं रं प्रस्फुर प्रस्फुर बुद्धिं विनाशय विनाशय ॐ ह्लीं रं रं रं रं रं

प्रस्फुर प्रस्फुर स्वाहा–ज्वालामुख्यधिष्टितां त्रिमूर्ति स्तम्भनास्त्र परीवृतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) चक्रराज रथारूढ ३-ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः बगलामुखि ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः सर्वदुष्टानां वाचं मुखं पदं स्तम्भय स्तम्भय ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः जिह्वां कीलय कीलय ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः बुद्धिं नाशय नाशय ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः स्वाहा-बृहद्भानुमुख्यधिष्टितां माया स्तम्भनास्त्र परीवृतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) चक्रराज रथारूढ ३-ॐसाळुवेशाय विद्महे पक्षिराजाय धीमहि तन्नो शरभः प्रचोदयात्-शरभास्त्र परीवृतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) चक्रराज रथारूढ ३-ॐ नमो भगवते विश्वामूर्तये नारायणाय श्रीपुरुषोत्तमाय रक्ष रक्ष युष्मद् दृष्टि प्रत्यक्षं परोक्षं वा अजीर्णं पचय विषूचिकान् हन हन एकाहिकां द्व्याहिकं त्रयाहिकां चातुर्थिक ज्वरं नाशय नाशय चतुराशीति वातान् अष्टादश क्षय रोगान् अष्टादश कुष्ठान् हन हन सर्व दोषान् भञ्जय भञ्जय तत् सर्वं शोषय शोषय आकर्षय आकर्षय शत्रून् मारय मारय उच्चाटय उच्चाटय विद्वेषय विद्वेषय स्तम्भय स्तम्भय निवारय निवारय विघ्नान् हन दह दह मथ मथ विध्वंसय विध्वंसय विद्रावय विद्रावय चक्रं गृहीत्वा शीघ्रं आगच्छ चक्रेण हनित्वा परविद्यां छेदय छेदय भेदय भेदय चतुराशीति विस्फोटकान् विस्फोटय विस्फोटय अर्ष वात शूल दृष्टि सर्प व्याघ्र द्विपद चतुष्पद अपर वाह्ये भुव्यन्तरिक्षे अन्येपि केचित् द्वेषकान् सर्वान् हन हन विद्युत् मेघ नदी पर्वत अटव्यान् सर्वस्थानानि रात्रि

दिन पथ चोरान् वशय वशय सर्वोपद्रवान् नाशय नाशय सर्व शत्रून् मर्दय मर्दय परसैन्यं विदारय विदारय पर चक्रं निवारय निवारय दह दह रक्षां कुरु कुरु ॐ नमो भगवते नारायणाय ह्रां ह्रीं ह्रूं फट् स्वाहा ठः ठः ठः नमः -नारयणास्त्र परीवृतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) चक्रराज रथारूढ ३-ॐ नमो भगवते महापाशुपताय नमः अतुल-बल-वीर्य-पराक्रमाय त्रिपञ्च नयनाय नानारूपाय नाना-प्रहरणोद्यताय सर्वाङ्ग-रक्ताय भिन्नाञ्जन-चय-प्रख्याय श्मशान-वेताल-प्रियाय सर्वविघ्न-निकृन्तन-रताय सर्वसिद्धि-प्रदाय भक्तानुकम्पिने असंख्य-वक्त्र-भुज-पादाय सिद्धाय वेताल-चित्रासिने शाकिनी-क्षोभ-जनकाय व्याधि-निग्रह-कारिणे पाप भञ्जनाय सूर्य-सोमाग्नि-नेत्राय विष्णु-कवचाय खड्ग-वज्र-हस्ताय यम-दण्ड वरुण-पाशाय रुद्र-शूलाय ज्वलज्जिह्वाय सर्वरोगविद्रावणाय ग्रह-निग्रह-कारिणे दुष्ट-नाग-क्षय-कारिणे ॐ कृष्णपिङ्गलाय फट्-हूङ्कारास्त्राय फट्-वज्राय फट्-वज्रहस्ताय फट्-अग्नये फट्-दण्डाय फट्-यमाय फट्-खड्गाय फट्- नैर्ऋताय फट्- पाशाय फट्-वरुणाय फट्-ध्वजाय फट्-अङ्कुशाय फट्-वायवे फट्-गदायै फट्-कुबेराय फट्-त्रिशूलाय फट्-मुद्गराय फट्-चक्राय फट्-पद्माय फट्-नागास्त्राय फट्-ईशानाय फट्-खेटकास्त्राय फट्-मुण्डाय फट्-मुण्डास्त्राय फट्-कङ्कालास्त्राय फट्-पिच्छिकास्त्राय फट्-क्षुरिकास्त्राय फट्-ब्रह्मास्त्राय फट्-शक्त्यस्त्राय फट्-गणास्त्राय फट्-सिद्धास्त्राय फट्-पिलिपिच्छास्त्राय फट्-गन्धर्वास्त्राय फट्-पूर्वास्त्राय फट्-दक्षिणास्त्राय फट्- वामास्त्राय फट्-पश्चिमास्त्राय फट्-मन्त्रास्त्राय फट्-शाकिन्यस्त्राय फट्-योगिन्यस्त्राय फट्-दण्डास्त्राय फट्-महा दण्डास्त्राय फट्- नमोऽस्त्राय फट्-शिवास्त्राय फट्-ईशानास्त्राय फट्-पुरुषास्त्राय फट्-अघोरास्त्राय फट्- सद्योजातास्त्राय फट्- हृदयास्त्राय फट्-महास्त्राय फट्-गरुडास्त्राय फट्-राक्षसास्त्राय फट्-दानवास्त्राय फट्-

क्षौं नारसिंहास्त्राय फट्-त्वष्ट्रास्त्राय फट्-सर्वास्त्राय फट्-नः फट्-वः फट्-पः फट्-फः फट्-भः फट्-मः फट्-श्रीः फट्-पेः फट्-भूः फट्-भुवः फट्-स्वः फट्-महः फट्-जनः फट्-तपः फट्-सत्यं फट्-सर्वप्राण फट्-सर्व नाडी फट्-सर्वकारण फट्-सर्वदेव फट्-ह्रीं फट्-श्रीं फट्-ह्रूं फट्-स्रूं फट्-स्वा फट्-लां फट्-वैराग्याय फट्-मायास्त्राय फट्-कामास्त्राय फट्-क्षेत्रपालास्त्राय फट्-हुङ्कारास्त्राय फट्-भास्करास्त्राय फट्-चन्द्रास्त्राय फट्-विघ्नेश्वरास्त्राय फट्-गौः गां फट्- खों खौं फट्-हौं हों फट्-भ्रामय भ्रामय फट्-सन्तापय सन्तापय फट्-छादय छादय फट्- उन्मूलय उन्मूलय फट्-त्रासय त्रासय फट्-सञ्जीवय सञ्जीवय फट्-विद्रावय विद्रावय फट्-सर्वदुरितं नाशय नाशय फट्।-महापाशुपातास्त्र परीवृतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डसैन्य वधोद्युक्त शक्ति विक्रम हर्षीतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये दुर्मदस्य शिलीमुखेन वधोद्युक्त ३-क्लीं हैं ह्सौः ह्सौः हैं क्लीं रणकोलाहलाख्य गज समारूढ संपत्करी-विक्रम-हर्षीतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये कुरुण्डस्य अङ्कुशेन वधोद्युक्त ३-ॐ आं ह्रीं क्रों एहि परमेश्वरि स्वाहा अपराजिताख्य हयारूढ–अश्वारूढा-विक्रम-हर्षीतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये शत-गर्दभ-युत-रथारूढ करङ्ग-सेनाधिपतिं खड्गेन-वधोद्युक्ता ३- ओष्ठापिधाना नकुली दन्तैः परिवृता पविः । सर्वस्यै वाच ईशाना चारु मामिह वादयेत् ताक्ष्योरूढ-नकुली-विक्रम-हर्षीतां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये गजारूढ-काकवासि-सेनाधिपतिं खड्गेन -वधोद्युक्ता ३- ओष्ठापिधाना नकुली दन्तैः परिवृता पविः । सर्वस्यै वाच ईशाना चारु मामिह वादयेत् तार्क्ष्यारूढ-नकुली-विक्रम-हर्षीतां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये महोष्ट्रारूढ वज्रदन्त-सेनाधिपतिं खड्गेन-वधोद्युक्ता ३- ओष्ठापिधाना नकुली दन्तैः परिवृता पविः । सर्वस्यै वाच ईशाना चारु मामिह वादयेत् तार्क्ष्यारूढ-नकुली-विक्रम-हर्षीतां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये कीवन्तारुह्य वज्रमुख-सेनाधिपतिं खड्गेन-वधोद्युक्ता ३- ओष्ठापिधाना नकुली दन्तैः परिवृता पविः । सर्वस्यै वाच ईशाना चारु मामिह वादयेत् तार्क्ष्यारूढ-नकुली-विक्रम-हर्षीतां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये गृध्र युग रथारूढ वज्रलोम-सेनाधिपतिं खड्गेन-वधोद्युक्ता ३- ओष्ठापिधाना नकुली दन्तैः परिवृता पविः । सर्वस्यै वाच ईशाना चारु मामिह वादयेत् तार्क्ष्यारूढ-नकुली-विक्रम-हर्षीतां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये पञ्चसेनाधिपतिसृष्टित सर्पिणी देहोद्भूता अनेक कोटि भयङ्कर विष सर्प ध्वंसीकृत स्वदन्तोद्भूत कोटि नकुलोत्पन्ना अक्षीण-नकुलास्त्रप्रयोगिता ३- ओष्ठापिधाना नकुली दन्तैः परिवृता पविः । सर्वस्यै वाच ईशाना चारु मामिह वादयेत् तार्क्ष्यारूढ-नकुली-विक्रम-हर्षीतां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पू-तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये पञ्चसेनाधिपतिसृष्टित सर्पिणी मायान्तक गरुडास्त्रेण प्रयोगिता ३- ओष्ठापिधाना नकुली दन्तैः परिवृता पविः। सर्वस्यै वाच ईशाना चारु मामिह वादयेत् ताक्ष्यारूढ-नकुली-विक्रम-हर्षीतां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये कीकसा गर्भजात संहारगुप्ताख्य गृध्रपृष्ठारूढ धनुर्धर रणेषु सूर्यदेवस्य नेत्र सान्निध्य वरप्राप्त बलाहक सेनाधिप-युद्धे अन्धास्त्र प्रयोगितां-तां खड्गेन-वधोद्युक्ता-३- ऐं नमो भगवति तिरस्करिणि महामाये पशु जन मनश्चक्षु स्तिरस्करणं कुरु कुरु हुं फट् स्वाहा तमोलिप्तरथारूढ-श्रीतिरस्करिणी-विक्रम-हर्षीतां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये कीकसा गर्भजात सूचिनिष्ठुरूपक्षित काकवाहनारुह्य रणेषु सूर्यदेवस्य नेत्र सान्निध्य वरप्राप्त सूचीमुख सेनाधिपस्य-युद्धे अन्धास्त्र प्रयोगितां-तां खड्गेन-वधोद्युक्ता-३- ऐं नमो भगवति तिरस्करिणि महामाये पशु जन मनश्चक्षु स्तिरस्करणं कुरु कुरु हुं फट् स्वाहा तमोलिप्तरथारूढ-श्रीतिरस्करिणी-विक्रम-हर्षीतां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये कीकसा गर्भजात फाल धर कङ्कमारुह्य रणेषु सूर्यदेवस्य नेत्र सान्निध्य वरप्राप्त फालमुख सेनाधिपस्य-युद्धे अन्धास्त्र प्रयोगितां-तां खड्गेन-वधोद्युक्ता-३-ऐं नमो भगवति तिरस्करिणि महामाये पशु जन मनश्चक्षुस्तिरस्करणं कुरु कुरु हुं फट् स्वाहा तमोलिप्तरथारूढ-श्रीतिरस्करिणी-विक्रम-हर्षीतां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये कीकसा गर्भजात भेरुण्डपतगारूढ रणेषु सूर्यदेवस्य नेत्र सान्निध्य वरप्राप्त विकर्ण सेनाधिपस्य-युद्धे अन्धास्त्र प्रयोगितां-तां खड्गेन-वधोद्युक्ता-३-ऐं नमो भगवति तिरस्करिणि महामाये पशु जन मनश्चक्षु स्तिरस्करणं कुरु कुरु हुं फट् स्वाहा तमोलिप्त रथारूढ-श्रीतिरस्करिणी-विक्रम-हर्षीतां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये कीकसा गर्भजात पट्टस धर कुक्कुटारूढ रणेषु सूर्यदेवस्य नेत्र सान्निध्य वरप्राप्त विकटानन सेनाधिपस्य-युद्धे अन्धास्त्र प्रयोगितां-तां खड्गेन-वधोद्युक्ता-३- ऐं नमो भगवति तिरस्करिणि महामाये पशु जन मनश्चक्षु स्तिरस्करणं कुरु कुरु हुं फट् स्वाहा तमोलिप्त रथारूढ-श्रीतिरस्करिणी-विक्रम-हर्षीतां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये कीकसा गर्भजात तपःश्मशान मन्त्रेण साधित भूत समाविष्ठ प्रेतारूढ वज्र-निष्ठुर-घोषकृत रणेषु सूर्यदेवस्य नेत्र सान्निध्य वरप्राप्त करालाक्ष सेनाधिपस्य-युद्धे अन्धास्त्र प्रयोगितां-तां खड्गेन-वधोद्युक्ता-३- ऐं नमो भगवति तिरस्करिणि महामाये पशु जन मनश्चक्षु स्तिरस्करणं कुरु कुरु हुं फट् स्वाहा तमोलिप्तरथारूढ- श्रीतिरस्करिणी-विक्रम-हर्षीतां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये कीकसा गर्भजात श्मशान भूमौ वेताल मन्त्रेण साधित वेताळारूढ रणेषु सूर्यदेवस्य नेत्र सान्निध्य वरप्राप्त करण्टक सेनाधिपस्य-युद्धे अन्धास्त्र प्रयोगितां-तां खड्गेन-वधोद्युक्ता-३- ऐं नमो भगवति तिरस्करिणि महामाये पशु जन मनश्चक्षु स्तिरस्करणं कुरु कुरु हुं फट् स्वाहा तमोलिप्तरथारूढ-श्रीतिरस्करिणी-विक्रम-हर्षीतां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) विषङ्ग-नयित निशाक्रमणे श्रीशक्ति चक्रैकनायिका श्री ललिताया आज्ञापनेन स्वतेजोभिः रणं सन्दीप्यमान ३-ॐ नमो भगवति ज्वालामालिनि देवदेवि सर्व भूतसंहर कारिके जातवेदसि ज्वलन्ति ज्वल ज्वल प्रज्वल प्रज्वल ह्रीं ह्रीं ह्रूं रर रर ररर ज्वालामालिनि हुं फट् स्वाहा औं-ज्वालामालिनी नित्या-पराक्रम-निरीक्षण समुत्सुखां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) विषङ्ग-नयित निशाक्रमणे श्रीशक्ति चक्रैक नायिका श्री ललिताया आज्ञापनेन स्व तेजोभिः रणं सन्दीप्यमान ३- ॐ ह्रीं वह्निवासिन्यै नमः उं-वहिनिवासिनी नित्या-पराक्रम-निरीक्षण समुत्सुखां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) विषङ्ग-नयित निशाक्रमणे दमक-सेनधिप-वधोत्साह ३-ऐं सकलह्रीं नित्यक्लिन्ने मदद्रवे सौः अं-कामेश्वरी नित्या-पराक्रम-निरीक्षण समुत्सुखां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) विषङ्ग-नयित निशाक्रमणे दीर्घजिह्व-सेनधिप-वधोत्साह ३-ऐं भगभुगे भगिनि भगोदरि भगमाले भगावहे भगगुह्ये भगयोनि भगनिपातिनि सर्वभगवशङ्करि भगरूपे नित्यक्लिन्ने भगस्वरूपे सर्वाणि भगानि मे ह्यानय वरदे रेते सुरेते भगक्लिन्ने क्लिन्नद्रवे क्षुभ क्षोभय सर्व सत्वान् भगेश्वरि ऐं ब्लूं जं ब्लूं भें ब्लूं मों ब्लूं हें ब्लूं हें क्लिन्ने सर्वाणि भगानि मे वशमानय स्त्रीं हब्लें ह्रीं आं-भगमालिनी नित्या-पराक्रम-निरीक्षण समुत्सुखां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) विषङ्ग-नयित निशाक्रमणे हुम्बक-सेनधिप-वधोत्साह ३- ॐ ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा इं-नित्यक्लिन्ना नित्या-पराक्रम-निरीक्षण समुत्सुखां श्रीललिता महा त्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) विषङ्ग-नयित निशाक्रमणे हुलुमुल्ल-सेनधिप-वधोत्साह
३- ॐ क्रों भ्रों क्रौं ज्रौं छ्रौं झ्रौं स्वाहा ईं-भेरुण्डा नित्या-पराक्रम-निरीक्षण
समुत्सुखां श्रीललिता महात्रिपुर सुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) विषङ्ग-नयित निशाक्रमणे कल्कस-सेनधिप-वधोत्साह
३- ॐ ह्रीं वह्निवासिन्यै नमः उं-वह्निवासिनी नित्या-पराक्रम-निरीक्षण समुत्सुखां
श्रीललिता महात्रिपुर सुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) विषङ्ग-नयित निशाक्रमणे कल्किवाहक-सेनधिप-वधोत्साह
३- ह्रीं क्लिन्ने ऐं क्रों नित्यमदद्रवे ह्रीं ऊं-महावज्रेश्वरी नित्या-पराक्रम-निरीक्षण
समुत्सुखां श्रीललिता महा त्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) विषङ्ग-नयित निशाक्रमणे पुल्कस-सेनधिप-वधोत्साह
३- ह्रीं शिवदूत्यै नमः ॠ-शिवदूती नित्या-पराक्रम-निरीक्षण समुत्सुखां
श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) विषङ्ग-नयित निशाक्रमणे पुण्ड्रकेतु-सेनधिप-वधोत्साह
३-ॐ ह्रीं हुं खे च छे क्षः स्त्रीं हुं क्षें ह्रीं फट् ॠृ-त्वरिता नित्या-पराक्रम-निरीक्षण
समुत्सुखां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) विषङ्ग-नयित निशाक्रमणे चण्डबाहु-सेनधिप-वधोत्साह
३- ऐं क्लीं सौः लृं-कुलसुन्दरी नित्या-पराक्रम-निरीक्षण समुत्सुखां श्रीललिता
महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) विषङ्ग-नयित निशाक्रमणे कुक्कुर-सेनधिप-वधोत्साह
३-हसकलरडैं हसकलरडीं हसकलरडौः लॄं-नित्या नित्या-पराक्रम-निरीक्षण
समुत्सुखां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) विषङ्ग-नयित निशाक्रमणे जम्भुकाक्ष-सेनधिप-वधोत्साह ३-ह्रीं फ्रें स्रूं क्रों आं क्लीं ऐं ब्लूं नित्यमदद्रवे हुं फ्रें ह्रीं एं-नीलपताका नित्या-पराक्रम-निरीक्षण समुत्सुखां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पू-तर्पयामि नमः

३- (मूलं) विषङ्ग-नयित निशाक्रमणे जम्भन-सेनधिप-वधोत्साह ३-भमरयऔउं ऐं-विजया नित्या-पराक्रम-निरीक्षण समुत्सुखां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) विषङ्ग-नयित निशाक्रमणे तीक्ष्णशृङ्ग-सेनधिप-वधोत्साह ३-स्वौं ॐ-सर्वमङ्गला नित्या-पराक्रम-निरीक्षण समुत्सुखां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) विषङ्ग-नयित निशाक्रमणे त्रिकण्टक-सेनधिप-वधोत्साह ३ ॐ नमो भगवति ज्वालामालिनि देवदेवि सर्वभूतसंहरकारिके जातवेदसि ज्वलन्ति ज्वल ज्वल प्रज्वल प्रज्वल ह्रीं ह्रीं ह्रूं रर रर ररर ज्वालामालिनि हुं फट् स्वाहा औं-ज्वालामालिनी नित्या-पराक्रम-निरीक्षण समुत्सुखां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पू-त-मि नमः

३- (मूलं) विषङ्ग-नयित निशाक्रमणे चन्द्रगुप्त-सेनधिप-वधोत्साह ३-च्कौं अं-चित्रा नित्या-पराक्रम-निरीक्षण समुत्सुखां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं)ससैन्य विषङ्ग पलायन कर ३-ऐं सकलह्रीं नित्यक्लिन्ने मदद्रवे सौः अं-कामेश्वरी नित्या कराकृष्ट चापोत्थ शर पराक्रम-निरीक्षण समुत्सुखां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं)ससैन्य विषङ्ग पलायन कर ३ऐं ग्लौं ऐं नमो भगवति वार्तालि वार्तालि वाराहि वाराहि वराहमुखि वराहमुखि अन्धे अन्धिनि नमः रुन्धे रुन्धिनि नमः जम्भे

जम्भिनि नमः मोहे मोहिनि नमः स्तम्भे स्तम्भिनि नमः सर्व दुष्टप्रदुष्टानां सर्वेषां सर्ववाक् चित्त-चक्षुर्मुख-गति-जिह्वा-स्तम्भनं कुरु कुरु शीघ्रं वश्यं ऐं ग्लौं ठःठःठःठः हुं अस्त्राय फट् महामहिषवाहना वज्रघोषाख्य-सिंहवाहना महाकृष्ण-मृग-वाहना स्तम्भिनी-सारथ्य-किरिचक्र-रथारूढ-श्रीकोलमुखी दण्डनाथा कालदण्डस्म त्विषा निर्गत बाण पराक्रम-निरीक्षण समुत्सुखां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) ३-ॐ नमो भगवति ज्वालामालिनि सर्वभूत संहार कारिके ज्वलन्ति ज्वल ज्वलं प्रज्वल प्रज्वल ह्रां ह्रीं ह्रूं ररर रररर ज्वालामालिनि हुं फट् स्वाहा - ज्वालामालिनिका-क्षिप्त वह्नि प्राकार मध्यगां श्रीललिता-महात्रिपुर सुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) ३- ॐ नमो भगवते विश्वामूर्तये नारायणाय श्रीपुरुषोत्तमाय रक्ष रक्ष युष्मद् दृष्टि प्रत्यक्षं परोक्षं वा अजीर्णं पचय विषूचिकान् हन हन एकाहिकां द्व्याहिकं त्रयाहिकां चातुर्थिक ज्वरं नाशय नाशय चतुराशीति वातान् अष्टादश क्षय रोगान् अष्टादश कुष्ठान् हन हन सर्व दोषान् भञ्जय भञ्जय तत् सर्वं शोषय शोषय आकर्षय आकर्षय शत्रून् मारय मारय उच्चाटय उच्चाटय विद्वेषय विद्वेषय स्तम्भय स्तम्भय निवारय निवारय विघ्नान् हन दह दह मथ मथ विध्वंसय विध्वंसय विद्रावय विद्रावय चक्रं गृहीत्वा शीघ्रं आगच्छ चक्रेण हनित्वा परविद्यां छेदय छेदय भेदय भेदय चतुराशीति विस्फोटकान् विस्फोटय विस्फोटय अर्ष वात शूल दृष्टि सर्प व्याघ्र द्विपद चतुष्पद अपर वाह्ये भुव्यन्तरिक्षे अन्येपि केचित् द्वेषकान् सर्वान् हन हन विद्युत् मेघ नदी पर्वत अटव्यान् सर्वस्थानानि रात्रि दिन पथ चोरान् वशय वशय सर्वोपद्रवान् नाशय नाशय सर्व शत्रून् मर्दय मर्दय परसैन्यं विदारय विदारय पर चक्रं निवारय निवारय दह दह रक्षां कुरु कुरु ॐ नमो भगवते नारायणाय ह्रां ह्रीं ह्रूं फट् स्वाहा ठः ठः ठः नमः नारायणास्त्रेण-वज्रघोषादि

त्रिंशत्-भण्डपुत्र-वधोद्युक्त-३- ऐं क्लीं सौः हंसयुक्त-किर्णी-रथारूढ-बाला-विक्रम-नन्दितां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं)विशुक्र-कृत-अलसा कृपणा दीना निद्रा तन्द्रा प्रमीलिका क्लीबाख्य शक्तिप्रतिष्ठित जय विघ्न-यन्त्र-निर्भिन्नने श्रीकामेश्वर-मुखालोकनेन-कल्पित ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा श्रीसिद्धलक्ष्म्या-लिङ्गित मूषिकारूढ श्रीमहागणेशस्य पराक्रमेण प्रहर्षितां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुर नियुक्त स-सेना सहित गजासुर वधोत्साहॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा ऋद्धि आमोदादि सहित श्रीसिद्धलक्ष्म्यालिङ्गित मूषिकारूढ श्रीमहागणेशस्य पराक्रमेण प्रहर्षितां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये उलूकजित वधोद्युक्त-ॐ आं ह्रीं क्रों एहि परमेश्वरि स्वाहा अपराजिताख्य-हयारूढ–अश्वारूढा-विक्रम-हर्षीतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये पुरुषेण वधोद्युक्त ३-क्लीं हैं ह्सौः ह्सौः हैं क्लीं रणकोलाहलाख्य-गज-समारूढ संपत्करी-विक्रम-हर्षीतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये विषेण वधोद्युक्त ३-ओष्ठापिधाना नकुली दन्तैः परिवृता पविः । सर्वस्यै वाच ईशाना चारु मामिह वादयेत् ताक्ष्यारूढ-नकुली-विक्रम-हर्षीतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पू-तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये कुन्तिषेण वधोद्युक्त ३-ऐं नमो भगवति तिरस्करिणि महामाये पशुजन-मनश्चक्षुस्तिरस्करणं कुरु कुरु हुं फट् स्वाहा तमोलिप्तरथारूढ-

श्रीतिरस्करिणी-विक्रम-हर्षीतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये कुरूषक-मलद वधोद्युक्त ३-लूं वाराहि लूं उन्मत्तभैरवि पादुकाभ्यां नमः सिंहारूढ-उन्मत्तभैरवी-विक्रम-हर्षीतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये कुरूच वधोद्युक्त ३-ऐं नमः उच्छिष्ट चाण्डालि मातङ्गि सर्ववशङ्करि स्वाहा दिव्य रथारूढ लघु-श्यामला-विक्रम-हर्षीतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये मङ्गल-वधोद्युक्त ३-ॐ ह्रीं नमो वाराहि घोरे स्वप्नं ठः ठः स्वाहा हयारूढ स्वप्नवाराही-विक्रम-हर्षीतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये द्रुघण-वधोद्युक्त ३-ऐं क्लीं सौः वदवद वाग्वादिनि स्वाहा हंसारूढ-वाग्वादिनी-विक्रम-हर्षीतां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र सैन्ये कोल्लट-वधोद्युक्त ३-ख्फ्रें महाचण्डयोगेशवरि वेतालारुढ चण्डकाळी-विक्रम-हर्षीतां श्रीललिता-महात्रिपुर सुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं)विशुक्र-प्रयुक्त तर्षास्त्र-प्रति दण्डनाथा-आज्ञापनेन सुरासिन्धु-वर्षित-सुरा-पान-वर्षेण-तोषितां श्रीललिता-महात्रिपुर सुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं)धनुर्वेद सम्मानित चित्रजीव धनुषा-मुक्त ब्रह्मशिरःअस्त्रेण विशुक्रवध-विरचित-ऐं ह्रीं श्रीं ऐं क्लीं सौः ॐ नमो भगवति श्रीमातङ्गीश्वरि सर्वजनमनोहारि

सर्वमुखरञ्जिनि क्लीं ह्रीं श्रीं सर्वराजवशङ्करि सर्वस्त्रीपुरुषवशङ्करि सर्वदुष्टमृगवशङ्करि सर्वसत्व-वशङ्करि सर्वलोकवशङ्करि अमुकं मे वशमानय स्वाहा सौः क्लीं ऐं श्रीं ह्रीं ऐं- हसन्ति सारथ्य सप्तपर्वात्मक-गेयचक्ररथारूढ-श्रीराजश्यामला मन्त्रिण्या-तोषितां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं)हलेनाकर्ष्य मुसल-ताडनेन विषङ्ग-प्राणहरण-ऐं ग्लौं ऐं नमो भगवति वार्तालि वार्तालि वाराहि वाराहि वराहमुखि वराहमुखि अन्धे अन्धिनि नमः रुन्धे रुन्धिनि नमः जम्भे जम्भिनि नमः मोहे मोहिनि नमःस्तम्भे स्तम्भिनि नमः सर्व दुष्टप्रदुष्टानां सर्वेषां सर्ववाक् चित्त-चक्षुर्मुख-गति-जिह्वा-स्तम्भनं कुरु कुरु शीघ्रं वश्यं ऐं ग्लौं ठःठःठःठः हुं अस्त्राय फट् स्तम्भिनी-सारथ्य-पञ्चपर्वात्मक-किरिचक्र-रथारूढ-श्रीकोलमुखी दण्डनाथा-वीर्य-नन्दितां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र निर्मुक्त शस्त्र-प्रत्यस्त्र-वर्षिणीं श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पू-तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र निर्मुक्त शक्ति दृष्टि नाशक अन्धतामिश्रास्त्रं-प्रति ३- ॐ तारे तुत्तारे तुरे स्वाहा महातारिण्यास्त्रवर्षिणीं श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र-निर्मुक्त पाषाण्डास्त्रं-प्रति ३- ॐ भूर्भुवस्स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् गायत्र्यस्त्रवर्षिणीं श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र निर्मुक्त शक्ति-नाशकास्त्रं-प्रति ३-ॐ गन्धर्वराज विश्वावसो ममाभिलषितां कन्यां प्रयच्छ स्वाहा गन्धर्वराज-विश्वावस्वस्त्र वर्षिणीं श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र निर्मुक्त अकालमृत्युकारक-अन्तकास्त्रं-प्रति ३-ॐ जुं सः मां पालय पालय महामृत्युञ्जयास्त्रवर्षिणीं श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र निर्मुक्त राजयक्ष्मादि-अनेक-रोगोत्पन्न-महारोगास्त्रं-प्रति ३- अच्युताय नमः अनन्ताय नमः गोविन्दाय नमः नामत्र्यास्त्र-वर्षिणीं श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र निर्मुक्त अन्धकास्त्रं-प्रति ३- (१)सूर्याक्षि तेजसे नमः (२)खेचराय नमः (३)असतो मा सद्गमय (४) तमसो मा ज्योतिर्गमय (५)मृत्योर्मा अमृतं गमय (६)उष्णो भगवान् शुचिरूपः (७)हंसो भगवान् शुचिरप्रतिरूपः (८)विश्वरूपं घृणिनं जात-वेदसं हिरण्मयं ज्योतिरेकं तपन्तं सहस्ररश्मिः शतधा वर्तमनः प्राण प्रजानामुदयत्येष सूर्यः (९)ॐ नमो भगवते सूर्यायऽहो वाहिनि वाहिन्यहोवाहिनि वाहिनि स्वाहा (१०)वयस्सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाध मानाः अपध्वान्तं ऊर्णुहि पूर्धि चक्षु र्मुमुग्ध्या स्मान् निधयेव बद्धान् (११)पुण्डरीकाक्षाय नमः (१२)पुष्करेक्षणाय नमः (१३) कमलेक्षणाय नमः (१४)अमलेक्षणाय नमः (१५)विश्वरूपाय नमः (१६)श्रीमहाविष्णवे नमः चक्षुष्मत्यस्त्रवर्षिणीं श्रीललिता-महात्रिपुर सुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र निर्मुक्त सर्वस्मृतिनाशकास्त्रं-प्रति ३-ॐ नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता भूयासं कर्णयोः श्रुतं माच्योढ्वं ममामुष्य ॐ श्रुतिधारणास्त्रवर्षिणीं श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र निर्मुक्त शक्ति-सैन्य-भयकारक-भयास्त्रं-प्रति ३-यत इन्द्र भयामहे ततो नो अभयं कृति मघवन् छग्धि तव तन्न ऊतये विद्विषो विमृतो जहि ।

स्वस्तिदा विशस्पति वृत्रहा विमृधो वशी वृषेन्द्रः पुर एतु नः स्वस्तिदा अभङ्करः अभ्यङ्कैन्द्रास्त्र वर्षिणीं श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र निर्मुक्त आयुर्नाशकास्त्रं-प्रति (१)सं सृष्टिनित्ये स्वाहा (२) हं स्थितिपूर्णे नमः (३)रं महासंहारिणि कृशे चण्डकाळि फट् (४)रं ह्स्ख्फ्रें महानाख्ये अनन्तभास्करि महाचण्डकाळि फट् (५)रं महासंहारिणि कृशे चण्डकाळि फट् -
हं स्थितिपूर्णे नमः -सं सृष्टिनित्ये स्वाहा-ह्स्ख्फ्रें महाचण्डयोगेश्वरि कालसङ्कर्षिण्य-स्त्रवर्षिणीं श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र निर्मुक्त मूकास्त्रं-प्रति ३-ऐं क्लीं सौः वदवद वाग्वादिनि स्वाहा वाग्वादिन्यस्त्रवर्षिणीं श्रीललिता-महात्रिपुर सुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र निर्मुक्त महासुरास्त्रोत्पन्न मधुकैटभ महिषासुर शुम्भ निशुम्भादि असुर सैन्य विध्वंसकरणे श्रीललिता देव्या-क्रुद्ध-भृशाविर्भूता ३-ऐं ह्रीं क्लीं चामुंडायै विच्चे अष्टादशभुजा महालक्ष्मी-रूप-धारिणीं श्रीललिता-महात्रिपुर सुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) कराङ्गुलि-नखोत्पन्न-नारायण-दशाकृति-रूपिणीं श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र निर्मुक्त वेद तस्कर सोमकास्त्रं-प्रति दक्षकराङ्गुष्ठ-नखोत्पन्न ३-ॐ नमो भगवते मं मत्स्याय श्रीं मत्स्यावतार-मूर्ति प्रभावतुष्टां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र निर्मुक्त आपः पूरित शक्तिसैन्य-मज्जत्मक-अर्णवास्त्र-प्रति दक्षकर-तर्जनी-नखोत्पन्न ३-ॐ नमो भगवते कूं कूर्मरूपाय धराधर-धुरन्धराय स्वाहा कूर्मावतार-मूर्ति प्रभावतुष्टां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र निर्मुक्त हिरण्याक्षास्त्रोत्पन्न-सहस्रशो-गदायुध-धर-हिरण्याक्ष-विध्वंसकरण दक्षकर-मध्यमा-नखोत्पन्न ३-ॐ नमो भगवते वराहरूपाय भूर्भुवस्स्वःपतये भूपतित्वं मे देहि ददापय स्वाहा वराहावतार-मूर्ति प्रभावतुष्टां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरस्य भृकुटी कुटिलाकृत-भ्रुवाविर्भूत-हिरण्यकशिपु-वधोद्युक्त दक्षकर-अनामिका-नखोत्पन्न ३-उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखं नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहं नारसिंहावतार-मूर्ति प्रभावतुष्टां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र निर्मुक्त सर्वदैवत-नाशात्मक महाबलीन्द्रास्त्रोत्पन्न महाबलेः पाश-बन्धन-कारक दक्षकर-कनिष्ठिका-नखोत्पन्न ३-ॐ नमो भगवते महाबलाय स्वाहा-वामनावतार-मूर्ति-प्रभावतुष्टां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र निर्मुक्त हैहैयास्त्रोत्पन्न-अनेक-सहस्रार्जुन-वधोद्युक्त वामकराङ्गुष्ठ-नखोत्पन्न ३-ॐ नमो भगवते जामदग्न्याय दुष्ट क्षत्रिय कुलान्तकाय रेणुकापुत्राय नमः परशुरामावतार-मूर्ति प्रभावतुष्टां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्रस्य हुङ्कार-शब्दाविर्भूत रावण-इन्द्रजित्-कुम्भकर्णादि राक्षस-सेना नाशनार्थं वामकर-तर्जनी-नखोत्पन्न ३-रां रामाय क्लीं रघुनन्दनाय हुं

जानकी वल्लभाय स्वाहा सभ्रातृ-लक्ष्मण सहित रामावतार-मूर्ति प्रभावतुष्टां श्रीललिता-महात्रिपुर सुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र निर्मुक्त द्विविधास्त्रोत्पन्न क्रूर-कपिसङ्घ-अभिहननार्थं वामकर-मध्यमा-नखोत्पन्न ३-ॐ क्लीं कालिन्दी भेदनाय सङ्कर्षणाय स्वाहा बलभद्र-रामावतार-मूर्ति प्रभावतुष्टांश्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र निर्मुक्त राजासुरास्त्रोत्पन्न कंसादि-असुर-राज-वधोद्युक्त वामकर-अनामिका-नखोत्पन्न ३-क्लीं कृष्णाय गोविन्दय गोपीजनवल्लभाय स्वाहा वासुदेव-सङ्कर्षण-प्रद्युम्न-अनिरुद्धाह्वय-चतुर्व्यूहमूर्तिरूप-धृत कृष्णावतार-मूर्ति प्रभावतुष्टां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र निर्मुक्त धर्मविप्लवक-घोर-कल्यास्त्रोद्भूत वेदविप्लवक-धर्म-द्रोहिणां प्राण-हिंसकानां विध्वं सकरणाय वामकर-कनिष्ठिका-नखोत्पन्न ३- कं कल्किने नमः जनार्दन-कल्क्यावतार-मूर्ति प्रभावतुष्टां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) भण्डासुरेन्द्र निर्मुक्त महामोहकास्त्रं-प्रति ३-ह्स्ख्फ्रें ह्सौः अहमहं अहमहं ह्सौः ह्स्ख्फ्रें श्रीं ह्रीं ऐं शाम्भवास्त्रवर्षिणीं श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) ३- ॐ नमो भगवते विश्वामूर्तये नारायणाय श्रीपुरुषोत्तमाय रक्ष रक्ष युष्मद् दृष्टि प्रत्यक्षं परोक्षं वा अजीर्णं पचय विषूचिकान् हन हन एकाहिकां द्व्याहिकं त्रयाहिकां चातुर्थिक ज्वरं नाशय नाशय चतुराशीति वातान् अष्टादश क्षय रोगान् अष्टादश कुष्ठान् हन हन सर्व दोषान् भञ्जय भञ्जय तत् सर्व शोषय शोषय आकर्षय आकर्षय शत्रून् मारय मारय उच्चाटय उच्चाटय विद्वेषय विद्वेषय

स्तम्भय स्तम्भय निवारय निवारय विघ्नान् हन दह दह मथ मथ विध्वंसय विध्वंसय विद्रावय विद्रावय चक्रं गृहीत्वा शीघ्रं आगच्छ चक्रेण हनित्वा परविद्यां छेदय छेदय भेदय भेदय चतुराशीति विस्फोटकान् विस्फोटय विस्फोटय अर्ष वात शूल दृष्टि सर्प व्याघ्र द्विपद चतुष्पद अपर वाह्ये भुव्यन्तरिक्षे अन्येपि केचित् द्वेषकान् सर्वान् हन हन विद्युत् मेघ नदी पर्वत अटव्यान् सर्वस्थानानि रात्रि दिन पथ चोरान् वशय वशय सर्वोपद्रवान् नाशय नाशय सर्व शत्रून् मर्दय मर्दय परसैन्यं विदारय विदारय पर चक्रं निवारय निवारय दह दह रक्षां कुरु कुरु ॐ नमो भगवते नारायणाय ह्रां ह्रीं ह्रूं फट् स्वाहा ठः ठः ठः नमः नारायणास्त्रेण-भण्डासुरेन्द्रसैन्य निर्दग्धा श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं)ॐ नमो भगवते महापाशुपताय नमः अतुल-बल-वीर्य-पराक्रमाय त्रिपञ्चनयनाय नानारूपाय नाना-प्रहरणोद्यताय सर्वाङ्गरक्ताय भिन्नाञ्जन-चय-प्रख्याय श्मशान-वेताल-प्रियाय सर्व-विघ्न-निकृन्तन-रताय सर्वसिद्धिप्रदाय भक्तानुकम्पिने असंख्य-वक्त्र-भुज-पादाय सिद्धाय वेताल-चित्रासिने शाकिनी-क्षोभ-जनकाय व्याधि-निग्रह-कारिणे पापभञ्जनाय सूर्य-सोमाग्निनेत्राय विष्णुकवचाय खड्ग-वज्र-हस्ताय यमदण्ड-वरुणपाशाय रुद्रशूलाय ज्वलज्जिह्वाय सर्वरोगविद्रावणाय ग्रह-निग्रह-कारिणे दुष्ट-नाग-क्षय-कारिणे ॐ कृष्णपिङ्गलाय फट्- हूङ्कारास्त्राय फट्-वज्राय फट्-वज्रहस्ताय फट्-अग्नये फट्-दण्डाय फट्-यमाय फट्-खड्गाय फट्- नैरृताय फट्- पाशाय फट्-वरुणाय फट्-ध्वजाय फट्-अङ्कुशाय फट्-वायवे फट्-गदायै फट्-कुबेराय फट्-त्रिशूलाय फट्-मुद्गराय फट्-चक्राय फट्-पद्माय फट्-नागास्त्राय फट्-ईशानाय फट्-खेटकास्त्राय फट्-मुण्डाय फट्-मुण्डास्त्राय फट्-कङ्कालास्त्राय फट्-पिच्छिकास्त्राय फट्-क्षुरिकास्त्राय फट्-ब्राह्मास्त्राय फट्-शक्त्यस्त्राय फट्-गणास्त्राय फट्-सिद्धास्त्राय

फट्-पिलिपिच्छास्त्राय फट्-गन्धर्वास्त्राय फट्-पूर्वास्त्राय फट्-दक्षिणास्त्राय फट्- वामास्त्राय फट्-पश्चिमास्त्राय फट्-मन्त्रास्त्राय फट्-शाकिन्यस्त्राय फट्-योगिन्यस्त्राय फट्-दण्डास्त्राय फट्- महादण्डास्त्राय फट्- नमोऽस्त्राय फट्-शिवास्त्राय फट्-ईशानास्त्राय फट्-पुरुषास्त्राय फट्-अघोरास्त्राय फट्-सद्योजातास्त्राय फट्-हृदयास्त्राय फट्-महास्त्राय फट्-गरुडास्त्राय फट्-राक्षसास्त्राय फट्-दानवास्त्राय फट्- क्षौं नारसिंह्मास्त्राय फट्-त्वष्ट्रास्त्राय फट्-सर्वास्त्राय फट्-नः फट्-वः फट्-पः फट्-फः फट्-भः फट्-मः फट्- श्रीः फट्-पेः फट्-भूः फट्-भुवः फट्-स्वः फट्-महः फट्-जनः फट्-तपः फट्-सत्यं फट्-सर्वप्राण फट्-सर्वनाडी फट्- सर्वकारण फट्- सर्वदेव फट्- ह्रीं फट्-श्रीं फट्- ह्रूं फट्- सूं फट्-स्वा फट्-लां फट्-वैराग्याय फट्-मायास्त्राय फट्-कामास्त्राय फट्-क्षेत्रपालास्त्राय फट्-हुङ्कारास्त्राय फट्-भास्करास्त्राय फट्-चन्द्रास्त्राय फट्-विघ्नेश्वरास्त्राय फट्-गौः गां फट्-खों खौं फट्-हौं हों फट्-भ्रामय भ्रामय फट्-सन्तापय सन्तापय फट्-छादय छादय फट्-उन्मूलय उन्मूलय फट्-त्रासय त्रासय फट्- सञ्जीवय सञ्जीवय फट्- विद्रावय विद्रावय फट्-सर्वदुरितं नाशय नाशय फट्।महापाशुपतस्त्रेण चत्वारिंशत्-भण्डा सुरेन्द्र-सैन्य-सेनाधिप-निर्दग्धां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) ३-ऐं क्लीं सौः ॐ श्रीं ह्रीं हसक्षमलयऊं सहक्षमलवरयऊं यरलवक्षमयऊं ॐ ह्रीं श्रीं ॐ सौः क्लीं ऐं महाकामेश्वरास्त्रेण स-भण्डासुर शून्यक-नगर-निर्दग्धां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) नमो नमस्ते जगदेकनाथे। नमो नमस्ते श्रीत्रिपुराभिधाने इति ब्रह्मोपेन्द्र महेन्द्रादि देव संस्तुत वैभवां श्रीललिता महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

ब्रह्मादय ऊचुः

नमो नमस्ते जगदेकनाथे नमो नमस्ते श्रीत्रिपुराभिधाने ।
नमो नमो भण्ड महासुरघ्नि नमोऽस्तु कामेश्वर वामकेशि ॥

चिन्तामणे चिन्तित दानदक्षेऽचिन्त्ये चिदाकार तरङ्ग माले ।
चित्राम्बरे चित्र जगत्प्रसूते चित्राख्यनित्याभिगते नमस्ते ॥

मोक्षप्रदे मुग्ध शशाङ्कचूडे मुग्धस्मिते मोह विभेद दक्षे ।
मुद्रेश्वरी चर्चित राज्यतन्त्रे मुद्राप्रिये देवि नमो नमस्ते ॥

क्रूरान्तकध्वंसिनि कोमलाङ्गि कोपेषु काली तनु मा दधाने ।
क्रोडानना पालित सैन्य चक्रे क्रोडीकृताशेष दये नमस्ते ॥

षडङ्गदेवी परिवारगुप्ते षडङ्गयुक्त श्रुतिवाक्य मृग्ये ।
षड्चक्रस्थे च षडूर्मिहन्त्रि षड्भावरूपे ललिते नमस्ते ॥

कामेश्वरीमुख-समस्तनित्या कान्तासनान्ते कमलायताक्षि ।
कामप्रदे कामिनि कामशम्भोःकाम्ये कलानामधिपे नमस्ते ॥

दिव्यौघ सिद्धौघ नरौघरूपे दिव्ये दिनाधीश सहस्र कान्ते ।
देदीप्यमाने दयया स नाथे देवाधिदेव प्रमथे नमस्ते ॥

सदाणिमाद्यष्टक सेवनीये सदा शिवात्मोज्ज्वलमञ्छवासे ।
सौम्ये सदेकायनपादपूज्ये सवित्रिलोकस्य नमो नमस्ते ॥

ब्राह्मीमुखैर्मातृगणैर्निषेव्ये ब्रह्मप्रिये ब्राह्मणि बन्धहन्त्रि ।
ब्रह्मामृतस्रोतसि राजहंसि ब्रह्मेश्वरि श्रीललिते नमस्ते ॥

संक्षिभिणीमुख्य समस्त मुद्रा संसेविते संसरण प्रहन्त्रि ।
संसार लीलाकरि सारसाक्षि सदा नमस्ते ललिताऽधिनाथे ॥

नित्या कला षोडशकेन नामाकर्षिण्यादि श्रीप्रमथेन सेव्ये ।
नित्ये निरताङ्क दयाप्रपञ्चे निल्ललकश्रेणि नमो नमस्ते ॥

अनङ्गपुष्पादिभिरुन्मादाभिरनङ्गदेवीभिरजस्र सेव्ये अभव्यहन्त्रि अक्षर राशि रूपे
हतारि वर्गे ललिते नमस्ते ॥

संक्षोभिणीमुख्य चतुर्दशार्चिर्मालावृतोदार महाप्रदीपं ।
आत्मानमाबिभ्रति विभ्रमाढ्ये शुभ्राश्रये शुद्धपदे नतिस्ते ॥

स सर्वसिद्ध्यादिक शक्ति वृन्दे सर्वज्ञ विज्ञात पदारविन्दे ।
सर्वाधिके सर्वगते समस्तसिद्धिप्रदे श्रीललिते नमस्ते ॥

सर्वज्ञतायुक् प्रमथादिभिरन्य देवीभिरप्याश्रित चक्रभूमे ।
सर्वामराकांक्षित पूरयत्रि स्वस्य लोकस्य सवित्रि पाहि ॥

वन्द्ये वशिन्यादिक वाग्विभूतिवर्धिष्णु चक्रद्युतिवाह वाहे ।
बलाकह श्यामकचे वचोऽब्धे वरप्रदे सुन्दरि पाहि विश्वं ॥

बाणादिकैरायुध सार्वभौमैर् भण्डासुरानीक वनान्तदावैः ।
प्रत्यग्र तेजो ज्वलिताम्बुराशे प्रपाल्यमाने परितो नमस्ते ॥

कामेशि वज्रेशि भगेशिरूपे कल्ये कले काल विलोपदक्षे ।
कथावशेषीकृत दैत्यसौन्ये कामेश कान्ते कमले नमस्ते ॥

बिन्दुस्थिते बिन्दु कलैकरूपे ब्रह्मात्मिके बृंहित चित्प्रकाशे ।
बृहत्कुच भोग विलोल हारे बृहत्प्रभावे वरदे नमस्ते ॥

कामेश्वरोत्सङ्ग सदानिवासे कालात्मिके कन्दळितानुकम्पे ।
कल्पावसानोत्त्थित कालिरूपे कामप्रदे कल्पलते नमस्ते ॥

सर्वारुणे सान्द्र सुधासुशीते सारङ्ग शाबाक्षि सरिजवक्त्रे ।
सारस्यसारस्य सदैकभूमे समस्त विद्येशि सन्नमस्ते ॥

तव प्रभावेन चिदग्नि जायाः श्रीशम्भुनाथ प्रकटीकृतायाः ।
भण्डासुराद्याः समरे प्रचण्डा हता जगत् कण्टकतां प्रयाताः ॥

३- (मूलं) हरनेत्राग्नि संदग्ध काम सञ्जीवनौषधिं श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३-ईं क्लीं नमो भगवति रतिविद्ये महामोहिनि कामेशि सर्वलोकवशं कुरुकुरु स्वाहा रती विवाह काल श्रीपूर्णकुम्भ स्तनद्वयां- श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३-क्लीं ह्रीं श्रीं ॐ नमः मन्मथाय सर्वराज-सर्वस्त्रीपुरुष-सर्वदुष्टमृग-सर्वसत्व-सर्वलोक-वशङ्कराय मदनकामेश्वराय सर्वजनं मे वशमानय स्वाहा-अनङ्ग जीवन प्राण मन्त्रकुम्भ स्तनद्वयां श्रीललिता-महात्रिपुरसुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

३- (मूलं) सुमेरु-मध्य-शृङ्गे श्रीमन्नगरे चिन्तामणिगृहे पञ्चब्रह्मासने स्वाधीनवल्लभां श्रीशिवकामेश्वराङ्कस्थां श्रीललिता-महात्रिपुर- सुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः

श्रीनगरार्चनं (मन्दिर पूजा)

1. ३-अं द्वादशान्त-मध्ये रक्त-शुक्लात्मक गुरु-चक्रे ३-ह्स्ख्फ्रें हसक्षमलवरयूं सहक्षमलवरयीं ह्सौं स्हौः श्री अमुकाम्बा सहित श्री अमुकानन्दनाथ गुरु श्रीपादुकां पूजयामि नमः

2. ३-आं मूलाधार-कमलान्तः अष्टोत्तर शतधास्थित मणिसन्निभ कमले ३-ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा सिद्धलक्ष्मीयुक्त श्रीगणेशनाथ श्रीपादुकां पूजयामि तर्पयामि नमः

3. ३-इं हृत्सरोजम-मध्ये ३-ॐ घृणिः सूर्यादित्यों चक्षुष्मत्या-छाया-देव्यायुक्त श्रीसहस्रकिरण श्रीपादुकां पूजयामि तर्पयामि नमः

4. ३-ईं अनेक-कोटि-बहिः सहस्र-कोटि-योजन-विस्तीर्ण अखण्डाकार-वृत्यात्मक अमृताम्भोनिधौ ३-कएईलह्रीं त्रिपुरसुन्दरि विद्महे हसकहलह्रीं पीठकामिनि धीमहि सकलह्रीं तन्नः क्लिन्ने प्रचोदयात्-श्रीत्रिपुरागायत्र्यम्बा श्रीपादुकां पूजयामि तर्पयामि नमः

5. ३-उं स्थूल-देहात्मक-नवरत्न-द्वीपे कालायस-प्राकार-चतुर्द्वार-पालकाय रक्त द्वादश शक्ति-युक्त३-ॐ ह्रीं हंसः सोहं स्वाहा श्रीद्वीपनाथाख्य जीवात्म श्रीपादुकां पूजयामि तर्पयामि नमः

6. ३-ऊं लिङ्ग-देहात्मक कालायस-कांस्य प्राकारान्तराल-गत नाना-वृक्ष-महोद्यानमध्ये ॐ ह्रीं क्ष्म्रीं हूं महाकालाय ह्रीं महादेवाय क्रीं कालिकायै ह्रीं महाकाल सहित महाकालिका श्रीपादुकां पूजयामि नमः

7. ३-ऋं कांस्य-ताम्र-प्राकारान्तराल-गत सङ्कल्प-विकल्प-रूप तैजसात्मक कल्पवाटिका-मध्ये मधुश्री-माधवश्री सहित मधुर-रसात्म श्रीवसन्त-ऋतुनाथ श्रीपादुकां पूजयामि तर्पयामि नमः

8. ३-ॠं ताम्र-सीस-प्राकारान्तराल-गत शब्द-तन्मात्रत्मक सन्तानवाटिकामध्ये शुक्रश्री-शुचिश्री सहित आम्ल-रसात्म श्रीग्रीष्म-ऋतुनाथ श्रीपादुकां पूजयामि तर्पयामि नमः

9. ३-लृं सीस-पित्तल-प्राकारान्तराल-गत स्पर्श-तन्मात्रत्मक हरिचन्दनवाटिकामध्ये नभश्री-नभस्यश्री सहित तिक्त-रसात्म श्रीवर्ष-ऋतुनाथ श्रीपादुकां पूजयामि तर्पयामि नमः

10. ३-ॡं पित्तल-पञ्चलोह-प्राकारान्तराल-गत रुप-तन्मात्रत्मक मन्दारवाटिकामध्ये इषश्री ऊर्जश्री सहित कटु-रसात्म श्रीशरदृतुनाथ श्रीपादुकां पूजयामि तर्पयामि नमः

11. ३-एं पञ्चलोह-रूप्य-प्राकारान्तराल-गत-रस-तन्मात्रत्मक पारिजातवाटिकामध्ये सहश्री-सहस्यश्री सहित कषाय-रसात्म श्रीहेमन्त-ऋतुनाथ श्रीपादुकां पूजयामि तर्पयामि नमः

12. ३-ऐं रूप्य-स्वर्ण-प्राकारान्तराल-गत गन्ध-तन्मात्रत्मक कदम्बवाटिकामध्ये -३-ऐं ह्रीं श्रीं ऐं क्लीं सौः ॐ नमो भगवति श्रीमातङ्गीश्वरि सर्वजनमनोहारि सर्वमुखरञ्जिनि क्लीं ह्रीं श्रीं सर्वराजवशङ्करि सर्वस्त्रीपुरुषवशङ्करि सर्वदुष्टमृगवशङ्करि सर्वसत्व-वशङ्करि सर्वलोकवशङ्करि अमुकं मे वशमानय स्वाहा सौः क्लीं ऐं श्रीं ह्रीं ऐं-श्रीश्यामलाम्बा श्रीपादुकां पूजयामि तर्पयामि नमः

13. ३-ओं रूप्य-स्वर्ण-प्राकारान्तराल-गत गन्ध-तन्मात्रत्मक कदम्बवाटिकामध्ये तपश्री तपस्यश्री सहित लवण-रसात्मने श्रीशिशिर-ऋतुनाथ श्रीपादुकां पूजयामि तर्पयामि नमः

14. ३-औं स्वर्ण-पुष्पराग-रत्न-प्राकारान्तरालगत मांस-धात्वात्मक-पुष्परागरत्नतरु-वाटिका मध्ये ३-ॐ जुं सः मां पालय पालय - सिद्धगणावृत-श्रीचण्डिकायुक्त श्रीमृत्युञ्जयनाथ श्रीपादुकां पूजयामि तर्पयामि नमः

15. ३-अं पुष्परागरत्न-पद्मरागरत्न-प्राकारान्तराल-गत ओजो-धात्वात्मक पद्मरागरत्नतरु-वाटिका-मध्ये ३-अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं चारणगणावृत श्रीमातृकाम्बा श्रीपादुकां पूजयामि तर्पयामि नमः

16. ३-अः पद्मराग-रत्न-गोमेधक-रत्न-प्राकारान्तराल-गत मेधो-धात्वात्मक गोमेधक-रत्नतरु-वाटिका-मध्ये (१)सं सृष्टिनित्ये स्वाहा (२)हं स्थितिपूर्णे नमः (३)रं महासंहारिणि कृशे चण्डकाळि फट् (४)रं ह्स्ख्फ्रें महानाख्ये अनन्तभास्करि महाचण्डकाळि फट् (५)रं महासंहारिणि कृशे चण्डकाळि फट् -हं स्थितिपूर्णे नमः -सं सृष्टिनित्ये स्वाहा-ह्स्ख्फ्रें महाचण्डयोगेश्वरि योगिनी-भैरव-गणावृत-श्रीकालसंकर्षिण्यम्बा श्रीपादुकां पूजयामि तर्पयामि नमः

17. ३-कं गोमेधक-रत्न-वज्र-रत्न-प्राकारान्तराल-गत अस्थि-धात्वात्मक वज्ररत्नतरुवाटिका-मध्ये ३-ॐ गन्धर्वराज विश्वावसो ममाभिलषितां कन्यां प्रयच्छ स्वाहा-अप्सरो-गणावृत गन्धर्वपतये श्रीविश्वावसुनाथ श्रीपादुकां पूजयामि तर्पयामि नमः

18. ३-खं वज्र-रत्न-वैडूर्य-रत्न-प्राकारान्तराल-गत त्वग्धात्वात्मक वैडूर्यरत्नतरु-वाटिका-मध्ये दैत्य-नाग-गणावृत ३-ॐ नमः कामरूपिणे

महाबलाय नागाधिपतये स्वाहा श्रीमहाशेषनाथ श्रीपादुकां पूजयामि तर्पयामि नमः

19. ३-गं वैडूर्यरत्न-हरिन्मणि-रत्न-प्राकारान्तराल-गत रोम-धात्वात्मक हरिन्मणिरत्नतरु-वाटिका-मध्ये ॐ भूर्भुवस्स्वः तत्सवितु वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्-मनु-गणावृत वेदमाता श्रीगायत्र्यम्बा श्रीपादुकां पूजयामि तर्पयामि नमः

